पथः। न दुष्येत् शूद्रजातीनां कुर्य्यात् सर्वेषु विक्रयम्” ॥ कालिकापुराणे। “विक्रयं सर्ववस्तूनां कुर्वन् शूद्रो न दोषभाक्॥ मधुचर्मसुरां लाक्षां त्यक्त्वा मांसञ्च पञ्चमम्”। एतदप्यापदि, दोषापवादमाह गौतमः। “विनिमयस्तु रसानां रसैः पशूनाञ्च लवणकृतान्नयोस्तिलानाञ्च समेनामेन पक्वस्य संप्रत्यर्थे”। पशूनां समानजातीयैरसमानजातीयैर्वा पशुभिरेव परिवर्त्तो न तु द्रव्यान्तरेण। पक्वान्नस्य चामेन तण्डुलादिना तावत्परिमितेनेत्यर्थः। अत्र समशब्दादन्यद्रव्यपरिवर्त्ते न नियमः। मनुः “रसारसैर्विमातव्या नत्वेव लवणं रसैः। कृतान्नञ्चाकृतान्नेन तिलधान्येन तत्समाः” ॥ वशिष्ठः “रसारसैः समतोहीनतो वा विमातव्या नत्वेव लवणं रसैः तिलतण्डुलपक्वान्नविद्यामनुष्याश्च विहिताः परिवर्त्तकेन”। नारदः। “अशक्तौ भेषजस्यार्थे यज्ञहेतोस्तथैव च। यद्यवश्यन्तु विक्रेयास्तिला धान्येन तत्समाः” ॥ एतेन ‘काममुत्पाद्य कृष्यान्तु स्वयमेव कृषीवलः। विक्रीणीत तिलान् शुद्धान् धर्म्मार्थमचिरस्थितानिति” मनुवचनम् तिलविनिमयपरम् ॥

**अपतन्त्रक** पु० अपगतं तन्त्रं भिषजामधीनता यत्र कप्। वातरोगभेदे “वायुरूर्द्ध्वं व्रजेत् स्थानात् कुपितो हृदयं शिरः। शङ्खौ च पीडयत्यङ्गान्याक्षिपेन्नमयेच्च सः। निमीलिताक्षो निश्चेष्टस्तब्धाक्षो वापि कूजति। निरुच्छ्वासोऽथ वा कृच्छ्रादुच्छ्वस्य नष्टचेतनः। स्वस्थः स्याद्धृदये मुक्ते आवृते च प्रमुह्यति। कफान्वितेन वातेन ज्ञेय एषोऽपतन्त्रक इति” सुश्रुते २५५ पृ० तल्लक्षणमुक्तम्। “अपतन्त्रकातुरं नापतर्पयेदिति” सुश्रुतः।

**अपतर्पण** न० अप+तृप-भावे ल्युट्। रोगादौ—उपवासे, तृप्त्यभावे च। ‘अपगतं तर्पणं यस्य वा गतलोपः तर्पणशून्ये त्रि० “क्रियाभिश्चिकित्सेत् स्थूलमपतर्पणं युक्ताभिरिति” सुश्रुतः।

**अपतानक** पु० अपकृष्य अन्तरान्तरा तनुते तन कर्त्तरि—ण्वुल्। वातरोगभेदे “यदा तु धमनीः सर्व्वाः कुपितोऽभ्येति मारुतः। तदाक्षिपत्याशु मुहुर्मुहुर्देहं मुहुश्चरः। मुहुर्मुहुस्तदाक्षेपादाक्षेपक इति स्मृतः। सोऽपतानकसंज्ञोयः पातयत्यन्तरान्तरेति सुश्रुते आक्षेपकवातरोगस्यैवान्तरान्तरापतने अपतानकसंज्ञा” सु०२५४पृ०क्ता “अभिघातनिमित्तश्च शोणितातिस्रवाच्च यः। गर्भपातनिमित्तश्च न सिध्यत्यपतानक” इति तत्रैव तस्यासाध्यतोक्ता “अभुक्तवता पीतमम्लदधिमरिचवचायुक्तमनतानकं हन्ति तैलसर्पिर्वसाक्षौद्राणि चेति” सुश्रु०।

**अपत्नी** स्त्री नास्ति पतिर्यस्याः ‘विभाषा सपूर्व्वस्येति” पा० वा न ङीप् च। पतिरहितायां स्त्रियाम्। पक्षे अपतिरित्यपि कपि तु अपतिकेत्येव तत्रैवार्थे।

**अपत्नीक** पु० नास्ति सन्निकर्षे कर्म्मयोग्या, मृत्या वा पत्नी यस्य कप्। असन्निकृष्टपत्नीके, कर्म्मायोग्यपत्नीके, मृतपत्नीके च। “अपत्नीकस्याहवनीये तच्छ्रापिणः” कात्या० २,५,१८। ‘अपत्नीकस्य रजोदोषप्रसवप्रवासादिना असन्निहितपत्नीकस्य तच्छ्रापिण आहवनीयश्रापिणः आहवनीये हविःश्रपणं कुर्व्वतो यजमानस्य “आहवनीये आज्यमधिश्रयती” त्युक्तेः। आहवनीयश्रापिणोऽपि सन्निहितायां पत्न्यां गार्हपत्य एवाज्यमधिश्रयति, शाखान्तरे चैवं श्रूयते ‘यस्य व्रत्येऽहनि पत्न्यनालम्भुका (रजस्वला) स्यात्तामनपरुध्य यजेतेति”। केचित् अपत्नीको मृतपत्नीक इत्याहुः तस्याप्येकाकिन एवाधानं श्रूयते आश्वलायनब्राह्मणे, “पत्न्यां मृतायामग्निभिर्दग्धायां पुनर्विवाहासम्भवे आत्मार्थमग्न्याधानमाहापस्तम्बः दर्शपौर्णमासाग्रयणार्थं, शेषाणि कर्म्माणि न भवन्तीति” तथा त्रिकाण्डे मण्डनः ‘तस्मान्नग्नेरकदेशेन दग्धव्या पूर्व्वमारिणी पत्नी ज्येष्ठतरा वापि यज्ञपार्श्वे निरूपितम्” ॥ कात्यायनः (कर्मप्रदीपे) “मृतायामपि भार्य्यायां वैदिकाग्नीन्नहि त्यजेत्। उपाधिनापि तत्कर्म यावज्जीवं समापयेदिति”। तद्भा०(उपाधिना स्वर्णादितत्प्रतिमूर्त्त्या)। नास्ति पत्नी सहिता यस्य कप्। पत्नीसाहित्यरहिते। “पितृयज्ञमुपक्रम्य”। “अपत्नीकः” कात्या० ५,७,५। “पितृयज्ञो भवति केवलस्यैकाकिनो यजमानस्यैवाधिकारो न तु पत्नीसहितस्य। अतोऽत्र पत्न्याः प्रतिषेधात् “पत्नीं सन्नह्येति प्रैषस्याभावः। आज्यावेक्षणं त्वाज्यसंस्कारत्वादध्वर्युः करोतीति” तद्भा०।

**अपत्य** न० न पतन्ति पितरोऽनेन पत—वा करणे यत् न०त०। पुत्रदुहितृरूपे संताने। “नापुत्रस्य लोकोऽस्तीति श्रुतेः पुत्राभावे स्वर्गादिलोकानुत्पत्तेः “पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति पिष्टपमिति” या० स्मृतेश्च तदुत्पादने स्वर्गलोकलाभोक्तेः “पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः। तस्मात् पुत्र” इति स्मृत्या नरकनिस्तारकत्वस्य श्रुतेश्च सुतादीनां पतनाहेतुत्वात् तथात्वम् पौत्रादीनामपि पतनाहेतुत्वात् अपत्यत्वम्। अतएव “अपत्यं पौत्रप्रभृति गोत्रमिति” पा० सूत्रे पौत्रादीनामप्यपत्यशब्दवाच्यतोक्ता। पौत्रादीनां तु गोत्रसंज्ञापीति विशेषः। “अपत्यं पितुरेव स्यात् ततः